त्युक्तः। तथाच शिक्षायाम्। “ए ऐ तु कण्ठतालव्यावोऔ कण्ठोष्ठजौ स्मृतौ”॥) स च ह्रस्वो न भवति। (द्विमात्रत्वात् दीर्घस्त्रिमात्रत्वात् प्लुतश्च भवति। उदात्तानुदात्तस्वरितभेदैस्त्रिविधोऽपि पुनः प्रत्येकमनुनासिकाननुनासिकभेदाभ्यां षड्विध एव॥)

“ऐकारं परमं दिव्यं महाकुण्डलिनी स्वयम्।
कोटिचन्द्रप्रतीकाशं पञ्चप्राणमयं सदा॥
ब्रह्मविष्णुमयं वर्णं तथा रुद्रमयं प्रिये।
सदाशिवमयं वर्णं विन्दुत्रयसमन्वितम्”॥

इति कामधेनुतन्त्रम्॥ (वङ्गीयभाषायाम्) तस्य लेखनप्रकारो यथा,—

“एकाररूपमध्ये तु किञ्चिद्दक्षे तदोर्द्ध्वतः।
चन्द्रेन्द्रभानवस्तासु मात्रा शक्तिः क्रमात् स्मृताः॥
त्रिधा शक्तिमयी पूर्व्वा दुर्गा वाणी सरस्वती”।

इति वर्णोद्धारतन्त्रम्॥ *॥ तन्नामानि यथा,—

“ऐर्लज्जा भौतिकः कान्ता वायवी मोहिनी विभुः।
दक्षा दामोदरप्रज्ञोऽधरो विकृतमुख्यपि॥
क्षमात्मको जगद्योनिः परः परनिबोधकृत्।
ज्ञानामृता कपर्द्दिश्रीः पीठेशोऽग्निः समात्मकः॥
त्रिपुरा लोहिता राज्ञी वाग्भवो भौतिकासनः।
महेश्वरो द्वादशी च विमलश्च सरस्वती॥
कामकोटो वामजानुरंशुमान् विजयो जटा”।

इति तन्त्रशास्त्रम्॥ दन्तान्तः। योनिः। इति वीजवर्णाभिधानम्॥ (अनुबन्धविशेषः। यथाह कविकल्पद्रुमः। (“ऐर्थजादिः स्यादोर्निष्ठातनकोरनिट्”। एतेन यजादिगणीयत्वात् “ऐ वसौ निवासे इत्यस्य लिटिप्रभृतिषु सम्प्रसारणे कृते उवास इत्यादयो भवेयुः”॥ मातृकान्यासे अधरे न्यस्यतया तदाख्ययाप्यभिधानम्। मातृकान्यासमन्त्रो यथा। “एं नम ओष्ठे ऐं नमोऽधरे”॥ इति॥)

ऐ, अ, (एतीति। आ + इण् + विच्।) आह्वानम्। स्मरणम्। आमन्त्रणम्। इति मेदिनी॥

ऐः पुं, (एति प्राप्नोति सर्व्वम्। आङ् + इण् + विच्।) महेश्वरः। इति एकाक्षरकोषः॥

ऐकागारिकः, त्रि, (एकमसहायमगारं प्रयोजनमस्य। “ऐकागारिकट् चौरे” ५।१।११३ इति इकट् वृद्धिश्च निपातनात्।) चौरः। इत्यमरः। एकागारवासी॥

ऐकाहिकं, त्रि, (एकाहे भवम्। एकाह + ठक्।) एकाहनिष्पन्नम्। एकदिनान्तरभवम्। इति वैद्यकम्॥ (वैद्यकगोपालकृष्णकविभूषणकृतकषायसंग्रहे दास्यादिपाचने यथा। “भूतोत्थं विषमं त्रिदोषजजनितञ्चैकाहिकं द्व्याहिकम्॥

“काकजङ्घा बला श्यामा ब्रह्मदण्डी कृताञ्जलिः।
पृश्निपर्णी त्वपामार्गस्तथा भृङ्गराजोऽष्टमः॥
एषामन्यतमं मूलं पुष्येणोद्धृत्य यत्नतः।
रक्तसूत्रेण संवेष्ट्य बद्धमैकाहिकं जयेत्”॥

इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे॥) एकाहभवम्। यथा,—

“ऐकाहिकं द्वितीयस्थं तृतीयकचतुर्थकम्”।

इत्यादि माहेश्वरकवचम्॥

ऐकाहिकज्वरः, पुं, (ऐकाहिक एकाहभवो ज्वरः।) एकदिनान्तरागतज्वरः। तस्यौषधं यथा,—

“पीतं वृश्चिकमूलन्तु पर्य्युषितजलेन वै।
सार्द्धं विनाशयेद्दाहं ज्वरञ्च परमेश्वर!॥
शिखायाञ्चैव तद्बद्धं भवेदैकाहिकादिनुत्।
एतत् सकाञ्जिकं पीतं रक्तकुष्ठज्वरादिनुत्॥
वास्योदकेन पीतं तत् वृहद्विषहरं भवेत्”।

इति गारुडे १९३ अध्यायः॥

(“ऐकाहिको द्व्याहिकश्च त्र्याहिकश्च तथापरः”।

“मुस्तामृतामलक्यश्च नागरं कण्टकारिका।
कणाचूर्णान्वितः क्वाथस्तथा मधुसमन्वितः॥
ऐकाहिकं वा वेलाद्यं ज्वरजातं व्यपोहति।
वानरेन्द्रमुखं दिव्यं तरुणादित्यतेजसम्॥
ज्वरमैकाहिकं घोरं तत्क्षणादेव नश्यति।
वानराकृतिमालिख्य खटिकाभिः पुनः पृथक्॥
गन्धपुष्पाक्षतैर्धूपैरर्च्चयेद्भिषजां वरः”।

मन्त्रो यथा,

ॐ ह्रां क्रीं श्रीं सुग्रीवाय महाबलपराक्रमाय सूर्य्यपुत्राय अमिततेजसे ऐकाहिक-द्व्याहिक-त्र्याहिक-चातुर्थिक-महाज्वर-भूतज्वर-भयज्वर-शोकज्वर-क्रोधज्वर-वेलाज्वर-प्रभृतिज्वराणां बन्ध बन्ध क्रां क्रीं क्रूं फट् स्वाहा। इति हारीते चिकित्सास्थाने। २ अध्याये॥)

ऐक्यं, क्ली, (एक + भावे ष्यञ्।) एकस्य भावः। एकता। एकत्वम्। एकीभावः। यथा। शारदायाम्।

“गुरोर्लब्ध्वा पुनर्व्विद्यामष्टकृत्वो जपेत् सुधीः।
गुरुविद्यादेवतानामैक्यं सम्भावयन् धिया॥
प्रणमेद्दण्डवद्भूमौ गुरुं तं देवतात्मकम्”।

इति दीक्षातत्त्वम्॥

ऐक्षवं, त्रि, (इक्षोर्विकारः। इक्षु + अण्।) इक्षुविकारः। इक्षुसम्बन्धिगुड़ादि। इति स्मृतिः॥ (अस्य गुणादय इक्षुशब्दे ज्ञातव्याः॥)

ऐक्षवं, क्ली, (इक्षोर्भवम्। इक्षु + अण्।) इक्षुभवगुड़ादि। यथा,—

“कदली लवणी धात्री फलान्यगुड़मैक्षवम्।
अतैलपक्वं मुनयो हविष्यान्नं विदुर्बुधाः”॥

इति तिथ्यादितत्त्वम्॥ इक्षुगुड़ादिगुणा इक्षुशब्दे ज्ञातव्याः॥)

ऐङ्गुदं, क्ली, (इङ्गुद्या इदम्। “प्लक्षादिभ्योऽण्” ४।३।१६४। विधानसामर्थ्यान्नाणो लुक्।) इङ्गुदीवृक्षस्य फलम्। इत्यमरः॥ (“स्निग्धोष्णं तिक्तमधुरं वातश्लेष्मघ्नमैङ्गुदम्”॥ इति सूत्रस्थाने। ४६ अ। सुश्रुतेनोक्तम्॥)

ऐडुकं, क्ली, (एडुक एव। स्वार्थे अण्।) एडूकम्। इति भरतो द्विरूपकोषश्च॥

ऐणं, त्रि, (एणस्य इदम्। एण + अण्।) एणस्य चर्म्मादि। इत्यमरः॥

ऐणिकः, त्रि, (एणं मृगं हन्तीति। एण + ठक्।) एणहन्ता। इति व्याकरणम्॥

ऐणेयं, त्रि, (एण्या इदम्। एणी + ढञ्।) एण्याश्चर्म्मादि। इत्यमरः॥ स्त्रीणां रतिबन्धविशेषः। इति हेमचन्द्रः॥

ऐतिह्यं, क्ली, (इतिह उपदेशपारम्पर्य्यम्। तदेव। इतिह “अनन्तावसथेतिहभेषजाञ् ञ्यः”। ५। ४। २३। इति स्वार्थे ञ्यः।) पारम्पर्य्योपदेशः। तत्पर्य्यायः। इतिह। इत्यमरः॥ (यथा रामायणे। ५। ८७। २३।

“ऐतिह्यमनुमानञ्च प्रत्यक्षमपि चागमम्।
ये हि सम्यक् परीक्षन्ते कुतस्तेषामबुद्धिता”॥
“ऐतिह्यं नाम आप्तोपदेशो वेदादिः”।

इति विमानस्थाने। ८ अ। चरकेणोक्तम्॥)

ऐन्दवं, क्ली, (इन्दुर्देवता यस्य। इन्दु + अण्।) मृगशिरोनक्षत्रम्। इति ज्योतिषम्॥ यथा। मात्स्ये।

“अश्विनी रेवती मूलमुत्तरत्रयमैन्दवम्।
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते”॥

ऐन्दवं मृगशिरः। इति मठप्रतिष्ठातत्त्वम्॥ (इन्दोश्चन्द्रस्य इदम्। चन्द्रसम्बन्धिनि, त्रि। यथा, मनुः ११। १२५।

“सङ्करापात्रकृत्यासु मासं शोधनमैन्दवम्।
मलिनीकरणीयेषु तप्तः स्याद्यावकैस्त्र्यहम्”॥)

ऐन्दवी, स्त्री, (ऐन्दव + ङीप्।) सोमराजी। इति वैद्यकम्॥

ऐन्द्रं, क्ली, (इन्द्रो देवता यस्य। इन्द्र + अण्।) ज्येष्ठानक्षत्रम्। इति जटाधरः॥ मूलविशेषः। वन आदा इति भाषा। तत्पर्य्यायः। वनार्द्रका २ वनजा ३ अरण्यार्द्रका ४। अस्य गुणाः। कटुत्वम्। अम्लत्वम्। रुचिवह्निकारित्वञ्च। इति राजनिर्घण्टः॥ (इन्द्रस्य इदम्।) इन्द्रसम्बन्धिनि त्रि। (यथा मनुः ५। ९३।

“न राज्ञामघदोषोऽस्ति व्रतिनां न च सत्रिणाम्।
ऐन्द्रं स्थानमुपासीना ब्रह्मभूता हि ते सदा”॥
“ऐन्द्रंस्थानं राज्याभिषेकाख्यं आधिपत्यकारणम्”

इति तट्टीकायां कुल्लूकभट्टः॥ तथा रघुः २। ५०।

“महीतलस्पर्शनमात्रभिन्न-
मृद्धं हि राज्यं पदमैन्द्रमाहुः”॥
“ऐन्द्रमम्बु सुपात्रस्थमविपन्नं सदा पिबेत्”॥

इति वाभटे सूत्रे। ५ अ॥)

(इन्द्रस्यापत्यं पुमान्।) वालिवानरे (अर्ज्जुने जयन्ते च पुं॥ जलविशेषः।)

ऐन्द्रजालिकः, पुं, (इन्द्रजालेन दीव्यतीति। इन्द्रजाल + ठक्।) इन्द्रजालकारकः। तत्पर्य्यायः। प्रतीहारकः २ मायाकारकः ३ कौसृतिकः ४ मायावी ५ व्यंसकः ६ मायी ७ मायिकः ८। इति जटाधरः॥

ऐन्द्रलुप्तिकः, त्रि, केशघ्नरोगविशिष्टः। टेको इति भाषा। तत्पर्य्यायः। खल्लीटः २ खलतिः ३। इति भूरिप्रयोगः॥

ऐन्द्रिः, पुं, (इन्द्रस्यापत्यं पुमान्। इन्द्र + इञ्।) जयन्तनामा इन्द्रपुत्रः। काकः। इति मेदिनी॥ (“ऐन्द्रिः किल नखैस्तस्याः विददार स्तनौ द्विजः”। इति रघुवंशे। १२। २२॥) वालिनामवानरराजः। इति त्रिकाण्डशेषः॥ अर्ज्जुनः। इति हेमचन्द्रः॥